# चतुर्थः पाठः

D5QNH8

# वर्धमानः महावीरः



भारतवर्षे प्रचलितेषु धर्मसम्प्रदायेषु जैनधर्मः महत्त्वं भजते। वर्धमानः महावीरः एतस्य जैनधर्मस्य अन्यतमः महापुरुषः आसीत्। तस्य जन्म ईसापूर्वं 599 तमे वर्षे वैशालीनगरस्य कुण्डग्रामे अभवत्। बाल्यकाले तस्य नाम वर्धमानः इत्यासीत्। तस्य पितुः नाम सिद्धार्थः मातुश्च नाम त्रिशला इत्यासीत्। सः शैशवात् एव बुद्धिमान्, सदाचारसम्पन्नः विचारशीलश्च आसीत्। तस्य विवाहः यशोदानाम्न्या राजकुमार्या सह अभवत्। तस्य एका पुत्री प्रियदर्शिनी अजायत। वर्धमानः बाल्यकालादेव विरक्त आसीत्। समाजे प्रचलितः आडम्बरः, वर्गभेदः जीवहिंसा च तस्य मनसः विकलतायाः कारणानि आसन्। पितरि दिवङ्गते तस्य मनः शोकोद्विग्नमभवत्। मोहं मायां च परित्यज्य सः

संन्यासं गृहीतवान्। तदानीं सः त्रिंशद्वर्षवयस्क आसीत्। कठिनेन तपसा सः सत्यस्य शान्तेश्च अन्वेषणे प्रवृत्तोऽभवत्। द्वादशवर्षाणि यावत् तपः तप्त्वा सः ज्ञानं प्राप्नोत्। तपसा सः इन्द्रियाणि संनियम्य महावीरः जिनो वा अभवत्। जैनमतानुसारेण

वर्धमानमहावीरात् पूर्वं त्रयोविंशतिः तीर्थङ्कराः अभवन्। महावीरः जैनधर्मस्य अन्तिमः चतुर्विंशः तीर्थङ्करः आसीत्।

ज्ञानप्राप्तेः अनन्तरं महावीरः त्रिंशत् वर्षाणि यावत् जैनधर्मस्य महता उत्साहेन प्रचारम् अकरोत्। शनैः शनैः भारतस्य प्रायशः सर्वेषु राज्येषु जैनधर्मस्य सम्यक् प्रचारः स×जातः। तेन प्रदर्शितेन मार्गेण जनाः कैवल्यं प्राप्तुं समर्थाः भवन्ति। तस्य मतेन न केवलं मनुष्याः, पशवः, पक्षिणः वा प्राणवन्तः, अपितु वृक्षादिषु प्रस्तरादिष्वपि प्राणाः सन्ति। महावीरस्य उपदेशानुसारेण सम्यक्-दर्शनम्, सम्यक्-ज्ञानम्, सम्यक्-चरित्रम् इति त्रिरत्नोपासनया जनाः मोक्षं लभन्ते। शुद्धाचरणाय सत्य-अहिंसा-अस्तेय-ब्रह्मचर्य-अपरिग्रह इति प×चमहाव्रतानां विधानं सः अकरोत्। साधारणजनैः सह बिम्बिसार-अजातशत्रुप्रभृतयो राजानः अपि तस्य उपदेशैः प्रभाविताः अभवन्। तेनोपदिष्टस्य मार्गस्य सत्यम् अहिंसा च आधारभूते स्तः।

द्विसप्ततिवर्षवयसि पाटलिपुत्रसमीपे पावापुरीस्थाने महावीरः रुग्णो जातः निर्वाणं च प्राप्तः।

## शब्दार्थ

**अन्यतमः** = बहुतों में  से एक/सर्वश्रेष्ठ। **शैशवात्** = बचपन से। **सदाचारसम्पन्नः** = सदाचार से युक्त। **अजायत** = उत्पन्न हुई। (जन् धातु, लङ्लकार, प्रथम पुरुष, एक वचन)। **वर्गभेदः** = ऊँच-नीच का भेद-भाव।**विकलतायाः** = व्याकुलता के। **दिवङ्गते** = मरने पर। **शोकोद्विग्नम्** = शोक से सन्तप्त, बेचैन। **तदानीम्** = उस समय। **प्रवृत्तः** = लग गये। **संनियम्य** = नियन्त्रित करके। **त्रयोविंशतिः** = तेईस । **चतुर्विंशः** = चैबीसवें। **कैवल्यम्** = मोक्ष। **प्राणवन्तः** = सजीव। **प्रस्तरादिषु** = पत्थर आदि में।**त्रिरत्नोपासनया** = तीन रत्नों  के पालन से। अस्तेयम् (न + स्तेयम्) = चोरी न करना। **अपरिग्रहः** = अपने पास कुछ न रखना। **द्विसप्ततिवर्षवयसि** = बहत्तर वर्ष की उम्र में। **रुग्णः** = रोगी।

## अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

वर्धमानः त्रिंशद्वर्षवयस्कः शोकोद्विग्नः अपरिग्रहः

दिवङ्गते बिम्बिसारः द्विसप्ततिवर्षवयसि त्रिरत्नोपासना।

**2. एकपदेन उत्तरत -**

(क) वर्धमानमहावीरस्य पितुः नाम किम् आसीत् ?

(ख) वर्धमानमहावीरस्य मातुः नाम किम् आसीत् ?

(ग) जैनधर्मानुसारेण त्रिरत्नोपासनया जनाः किं लभन्ते ?

(घ) जैनधर्मस्य अन्तिमः तीर्थङ्करः कः आसीत् ?

**3. पूर्णवाक्येन उत्तरत -**

(क) महावीरः कति वर्षाणि यावत् जैनधर्मस्य प्रचारम् अकरोत् ?

(ख) महावीरस्य जन्म कुत्र अभवत् ?

(ग) महावीरस्य पुत्र्याः नाम किम् आसीत् ?

(घ) जैनमतानुसारेण महावीरात् पूर्वं कति तीर्थङ्कराः अभवन् ?

**4. प्रश्नानामुत्तराणि लिखत -**

(क) कानि पञ्च महाव्रतानि सन्ति ?

(ख) त्रिरत्नानि कानि सन्ति ?

(ग) महावीरस्य उपदेशैः के के प्रभाविताः अभवन् ?

(घ) महावीरस्य मनसः विकलतायाः कानि कारणानि आसन् ?

**5. मञ्जूषातः क्रियापदानि चित्वा वाक्यानि पूरयत -**

अकरोत् अभवत् गृहीतवान् आसीत्

(क) महावीरः जैनधर्मस्य श्रेष्ठः महापुरुषः ........................।

(ख) महावीरस्य जन्म वैशालीनगरस्य कुण्डग्रामे .....................।

(ग) जैनधर्मस्य प्रचारं महावीरः उत्साहेन .......................।

(घ) त्रिंशद्वर्षवयसि मोहमायां परित्यज्य महावीरः संन्यासम् ...........................।

**6. अधोलिखित-पदेषु सन्धि-विच्छेदं कुरुत -**

मतानुसारेण = .... +......

इत्यासीत् = ..... +....

उपदेशानुसारेण = ... + ...

त्रिरत्नोपासनया = ... + .....

**7. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) वर्धमान महावीर जैनधर्म के चैबीसवें तीर्थङ्कर थे।

(ख) महावीर की माता का नाम त्रिशला था।

(ग) पत्थर में भी प्राण हैं।

(घ) उस समय वे तीस वर्ष के थे।

शिक्षण-सङ्केत

-अहिंसा परमो धर्मः इति विषये चर्चां कारयत।